This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र. M317 विषय पुराण

नाव. गर्गसंहिता (विज्ञानखंड 9) मुद्रित

लेखक/लिपीकार —

पृष्ठ 8 काळ शके 1819 पूर्ण/अपूर्ण

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

# अथ श्रीमद्गर्गाचार्यसंहितायां विज्ञानखण्डं प्रारभ्यते ।

खण्डम् ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः ॥ ॥ बहुलाश्वउवाच ॥ ॥ हरेःश्रीकृष्णचंद्रस्यभक्तिमार्गस्तुयःपरः ॥ तंवदाशुमुनेमह्यंयेनभक्तोभवाम्यहम् ॥१॥ नारदउवाच ॥ भक्तिमार्गंवदिष्यामिवेदव्यासमुखाच्छ्रुतम् ॥ येनप्रसन्नोभवतिभगवान्भक्तवत्सलः ॥ २ ॥ शक्रंविजित्यकृष्णेनभुजदंडबलाद्धृता ॥ द्वारावत्यांसभादिव्यासुधर्मानाममैथिल ॥ ३ ॥ यत्रमंडपदेशस्यवैडूर्यस्तंभपंक्तयः ॥ राजंतेकोटिशोराजन्विश्वकर्मविनिर्मिताः ॥ ॥ ४ ॥ पद्मरागखचिद्भूमौश्रेण्यांवैविद्रुमाचिताः ॥ यत्रचित्रवितानानिभ्राजंतेमौक्तिकालिभिः ॥ ५ ॥ सिंहासनानिकुड्यानिकालमेघतडिद्द्युभिः ॥ जांबूनदसुवर्णानांप्रस्फुरत्कुंभकोटिभिः ॥ ६ ॥ बालार्करत्नकेयूरकांचीकंकणनूपुरैः ॥ शतचंद्रप्रतीकाशाःस्फुरत्कुंडलमंडिताः ॥ ७ ॥ गायन्तियत्रगंधर्व्योविद्याधर्योमुदान्विताः ॥ नृत्यंत्यःकलवादित्रैःस्पर्द्धयंत्यःपरस्परम् ॥ ८ ॥ यस्याश्चतुर्षुकोणेषुदेववृक्षैमनोरमैः ॥ नंदनंसर्वतोभद्रंध्रौव्यंचैत्ररथंवनम् ॥ ९ ॥ लक्षाणियत्रराजेंद्रसरांसिविमलानिच ॥ सहस्रदलपद्मानिभ्रमरैःसंकुलानिच ॥ १० ॥ दशयोजनवीस्तीर्णापंचयोजनमूर्द्धगा ॥ एतादृशीसुधर्माऽऽस्तेपताकाध्वजमंडिता ॥ ११ ॥ यत्रप्रविष्टःपुरुषआत्मानंमन्यतेऽमरम् ॥ यत्सिंहासनमासाद्यशक्रोहमितिमन्यते ॥ १२ ॥ सद्यस्त्रैलोक्यचातुर्यंतस्यदेहेप्रवर्तते ॥ यस्तिष्ठतेयत्रयावत्तावदूर्मिषडार्तिहा ॥ १३ ॥ यावंतश्चजनास्तत्रप्रविशंतिनरोत्तम ॥ स्वप्रभावेनसहसातावतीसाप्रकाशते ॥ १४ ॥ षट्पंचाशत्कोटिसंख्यायादवायत्रसानुगाः ॥ तच्चत्वरस्यैकदेशेदृश्यंतेतेचमैथिल ॥ १५ ॥ परिपूर्णतमःसाक्षाच्छ्रीकृष्णोभगवान्त्स्वयम् ॥ यत्रास्तेतस्यराजेंद्रवर्णनंकःकरोतिहि ॥ १६ ॥ अथतस्यांसुधर्मायांयदुकोटिसमावृतः ॥ उग्रसेनोगीयमानःसूतमागधबंदिभिः ॥ १७ ॥ आकाशादागतःसाक्षाद्वेदव्यासोमहामुनिः ॥ पाराशर्योघनश्यामस्तडिंत्पिंगजटाधरः ॥ १८ ॥ तंदृष्ट्वासहसोत्थाययदुराजःकृतांजलिः ॥ नत्वासनंसोपचारंदत्वातत्संमुखोभवत् ॥ १९ ॥ उग्रसेनउवाच ॥ ॥ अद्यमेसफलंजन्मसफलंगेहमद्यमे ॥ अद्यमेसफलोधर्मोब्रह्मंस्त्वय्यागतेसति ॥ २० ॥सदानंदेषुकुशलंकृष्णोन्वेष्योभवत्सुहि ॥ वदमेकुशलंदेवयेनस्वस्थोभवाम्यहम् ॥ २१ ॥ यत्रयत्रव्रजंतस्तेत्वादृशाःसाधवःप्रभो ॥ तत्रतत्रभवेत्सिद्धिर्लौकिकीपारलौकिकी ॥ २२ ॥ यत्रक्षणंस्थिताःसंतस्तत्रसाक्षात्स्वयंहरिः ॥ किमुलोकगुणाब्रह्मन्पाराशर्यमहामुने ॥ २३ ॥ मयातुपुण्यंयज्ञोवाकिंकृतंपूर्वजन्मनि ॥ येनवै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वारकाराज्यंप्राप्तोहंमुनिपुंगव ॥ २४ ॥ भवादृशाविप्रमुख्यागृहमायांतिनित्यशः ॥ तस्मात्परंहिसुकृतंजानेस्वस्यनसंशयः ॥ २५ ॥ ॥ व्यासउवाच ॥ ॥ धन्योसिराजशार्दूलधन्यातेविमलामतिः ॥ परंकृतंत्वयाराजन्सुकृतंपूर्वजन्मनि ॥ २६ ॥ पुरात्वंमरुतोराजाकृत्वायज्ञंजगज्जितम् ॥ निष्कारणोभूर्मनसाप्रसन्नोभूद्धरिस्तदा ॥ २७ ॥ अनीप्सितेनभावेनप्राप्तंचेदंपरंतप ॥ परिपूर्णतमःसाक्षाच्छ्रीकृष्णोभगवान्हरिः ॥ ॥ २८ ॥ असंख्यब्रह्मांडपतिर्गोलोकेशःपरात्परः ॥ सोयंभक्त्यावशीभूतःस्ववशस्तवमंदिरे ॥ २९ ॥ अहोभोजपतेमुक्तिंददातिभजतांहरिः ॥ नकर्हिचिद्भक्तियोगंदुर्लभंविद्धितंनृप ॥ ३० ॥ इति श्रीमद्गर्गाचार्यसंहितायांविज्ञानखण्डेनारदबहुलाश्वसंवादेव्यासागमनंनामप्रथमोऽध्यायः ॥ १ ॥ ॥ उग्रसेनउवाच ॥ ॥ धन्योस्म्यनुगृहीतोस्मितववर्णननिर्वृतः ॥ हृद्युद्गतंचसंदेहंदूरीकर्तुंभवान्क्षमः ॥ १ ॥ कर्मणांसनिमित्तानांकागतिःकिंचलक्षणम् ॥ कतिभेदाहितेषांवैब्रूहिब्रह्मन्यथातथम् ॥ २ ॥ ॥ व्यासउवाच ॥ ॥ गुणैःसर्वाणिकर्माणिसनिमित्तानिसंतिहि ॥ तान्येवचानिमित्तानिराजंस्त्यक्तफलानिहि ॥ ३ ॥ सनिमित्तंचयत्कर्मबंधनेविद्धियादव ॥ अनिमित्तंचयत्कर्ममोक्षदंपरमंशुभम् ॥ ४ ॥ सत्त्वंरजस्तमइतिगुणाःप्रकृतिसंभवाः ॥ तैर्व्याप्तंहिजगत्सर्वंयथार्थमिवविष्णुना ॥ ५ ॥ सत्त्वेप्रलीनाःस्वर्यांतिनरलोकंरजोलयाः ॥ तमोलयास्तुनरकंयांतिकृष्णंहिनिर्गुणाः ॥ ६ ॥ पंचाग्नितप्तकायावैसततंवनवासिनः ॥ लोकंसप्तऋषीणांतेयांतिनिर्गतकल्मषाः ॥ ॥ ७ ॥ संन्यासाश्रमकर्तारस्त्रिदंडधृतपाणयः ॥ जितेंद्रियमनोधर्माःसत्यलोकंव्रजंतिहि ॥ ८ ॥ अष्टांगयोगयोगींद्रानिर्मलाऊर्ध्वरेतसः ॥ जनलोकंमहर्लोकंयांतितेनात्रसंशयः ॥ ९ ॥ यज्ञकर्ताशक्रलोकेवसतेशाश्वतीःसमाः ॥ दानीचांद्रमसंलोकंव्रतीसौरंव्रजत्यलम् ॥ १० ॥ तीर्थयायीचाग्निलोकंसत्यसंधश्चवारुणम् ॥ वैष्णवाश्चापिवैकुंठंशैवाःशैवंव्रजंतिहि ॥ ११ ॥ पितॄन्यजंतियेनित्यंसुखैश्वर्यप्रजेप्सवः ॥ दक्षिणेनपथार्य्यम्णापितृलोकंव्रजंतिते ॥ १२ ॥ स्वर्लोकंवैतथास्मार्ताःपंचपूजनतत्पराः ॥ प्रजापतियजोयांतिदक्षादींश्चप्रजापतीन् ॥ १३ ॥ भूतानियांतिभूतेज्यायक्षान्यक्षयजस्तथा ॥ येयस्यभक्तास्तल्लोकंयांतिराजन्नसंशयः ॥ १४ ॥ तथापापरताराजन्दुःसंगवशवर्तिनः ॥ यमलोकंचतेयांतिनिरयैर्दारुणैर्वृतम् ॥ १५ ॥ पुनरावर्तिनोलोकाःसर्वेचाब्रह्मलोकतः ॥ पुनरावर्तिनोलोकान्विद्धिराजन्महामते ॥ १६ ॥ कर्मणांसनिमित्तानां



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मार्गएषगतागतः ॥ तावत्प्रमोदतेस्वर्गेयावत्पुण्यंसमाप्यते ॥ १७ ॥ क्षीणपुण्यःपतत्यर्वागनिच्छन्कालचोदितः ॥ यादवेंद्रमहाबाहोतस्मा
त्कर्मफलंत्यज ॥ १८ ॥ भक्तोनिष्कारणोभूत्वाज्ञानवैराग्यसंयुतः ॥ प्रेमलक्षणयाभक्त्याहरिभक्तजनप्रियः ॥ १९ ॥ भजश्रीकृष्णपादा
ब्जमभयंहंससेवितम् ॥ योमृत्युःसर्वलोकानांबलात्संहारकारकः ॥ २० ॥ सयत्रभगवद्धाम्निगतःसन्मृत्युमाप्नुयात् ॥ २१ ॥ ॥ उग्रसेनउ
वाच ॥ ॥ सर्वेलोकाहिभगवन्पुनरावर्तिनःस्मृताः ॥ तेभ्योजातंचवैराग्यंमनसोमेसमंततः ॥ २२ ॥ श्रीकृष्णधामपरमंयतोनावर्ततेगतः ॥
तल्लोकंवदमेब्रह्मन्कचास्तेसर्वतःपरम् ॥ २३ ॥ ॥ श्रीव्यासउवाच ॥ ॥ ब्रह्माण्डेभ्योबहिर्द्धामश्रीकृष्णस्यमहात्मनः ॥ यद्गताननिवर्तंते
तद्गोलोकंविदुःपरम् ॥ २४ ॥ ब्रह्माण्डोयंजीवसंघःपञ्चाशत्कोटियोजनैः ॥ विस्तृतःपरितोद्वाभ्यांशतकोटिविलंबितः ॥ २५ ॥ यदन्तरग
तोराजल्लक्ष्यतेपरमाणुवत् ॥ तदन्तरगताश्चान्येकोटिशोह्यण्डराशयः ॥ २६ ॥ नतद्भासयतेसूर्योनशशांकोनपावकः ॥ कामःक्रोधश्चलो
भश्चनमोहोयत्रयातिच ॥ २७ ॥ नयत्रशोकोनजरानमृत्युर्नार्तिरेवच ॥ नप्रधानंनकालश्चविशंतेचगुणाःकुतः ॥ २८ ॥ शब्दब्रह्माप्यनि
र्वाच्यंतद्वर्णयितुमक्षमम् ॥ श्रीकृष्णतेजःसंम्भूतास्तत्रसंतिचपार्षदाः ॥ २९ ॥ अकिञ्चनाश्चयेदान्ताशान्तावैसमचेतसः ॥ श्रीकृष्णचन्द्र
पादाब्जमकरन्दरसालयाः ॥ ३० ॥ प्रेमलक्षणयाभक्त्यासदानिष्कारणाःपराः ॥ लोकानुल्लंघ्यतद्धामयांतिराजन्नसंशयः ॥ ३१ ॥ ॥ इ
तिश्रीग०सं०विज्ञा०ना०ब०सं०व्यासोग्रसेनसंवादे लोकगतिनिरूपणंनामद्वितीयोऽध्यायः ॥ २ ॥ ॥ उग्रसेनउवाच ॥ ॥ श्रुतातवमुखा
द्ब्रह्मन्गुणकर्मगतिर्मया ॥ पुनरावर्तिनोलोकास्तयासंतिविनिश्चिताः ॥ १ ॥ निष्कारणाद्धरेःसाक्षात्सेवनाद्धामदुर्लभम् ॥ लभतेपरमंदि
व्यंभक्तानांतच्छ्रुतंमया ॥ २ ॥ भक्तियोगःकतिविधोवदमेवदतांवर ॥ येनप्रसन्नोभवतिभगवान्भक्तवत्सलः ॥ ३ ॥ ॥ श्रीव्यासउवाच ॥
द्वारावतीशधन्योसिश्रीकृष्णेष्टोहरिप्रियः ॥ पृच्छसेभक्तियोगंत्वंधन्यातेविमलामतिः ॥ ४ ॥ यंश्रुत्वानिर्मलोभूयाद्विश्वघात्यपिपातकी ॥ तं
भक्तियोगंविशदंतुभ्यंवक्ष्यामियादव ॥ ५ ॥ भक्तियोगोद्विधाराजन्सगुणश्चैवनिर्गुणः ॥ सगुणःस्याद्बहुविधोनिर्गुणश्चैकलक्षणः ॥ ६ ॥ भा
वोविभिद्यतेपुंसांगुणमार्गेणदेहिनाम् ॥ तैर्गुणैस्त्रिविधाभक्ताभवंतिशृणुतान्पृथक् ॥ ७ ॥ हिंसांदंभंचमात्सर्य्यमभिसंधायभिन्नदृक् ॥ कुर्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्भावंहरौक्रोधीतामसःपरिकीर्तितः ॥ ८ ॥ यशऐश्वर्यविषयानभिसंधाययत्नतः ॥ अर्चयेद्योहरिंराजन्राजसःपरिकीर्तितः ॥ ९ ॥ उद्दिश्य
कर्मनिर्हारमपृथग्भावएवहि ॥ मोक्षार्थंभजतेविष्णुंसभक्तःसात्विकःस्मृतः ॥ १० जिज्ञासुरार्तोज्ञानीचतथार्थार्थीमहामते ॥ चतुर्विधा
जनाविष्णुंभजंतिकृतमंगलाः ॥ ११ ॥ एवंबहुविधेनापिभक्तियोगेनमाधवम् ॥ भजंतिसनिमित्तास्तेजनाःसुकृतिनःपरे ॥ १२ ॥ लक्षणंभ
क्तियोगस्यनिर्गुणस्यतथाशृणु ॥ तद्गुणश्रुतिमात्रेणश्रीकृष्णेपुरुषोत्तमे ॥ १३ ॥ परिपूर्णतमेसाक्षात्सर्वकारणकारणे ॥ मनोगतिरविच्छि
न्नाखंडिताहैतुकीचया ॥ १४ ॥ यथाब्धावंभसागंगासाभक्तिर्निर्गुणास्मृता ॥ निर्गुणानांचभक्तानांलक्षणंशृणुमानद ॥ १५ ॥ सार्वभौमंपा
रमेष्ठ्यंशक्रधिष्ण्यंतथैवच ॥ रसाधिपत्यंयोगर्द्धिंनवांछंतिहरेर्जनाः ॥ १६ ॥ हरिणादीयमानंवासालोक्यंयादवेश्वर ॥ नगृह्णंतिकदाचित्ते
तत्संगानंदनिर्वृताः ॥ १७ ॥ सामीप्यंतेनवांछंतिभगवद्विरहातुराः ॥ सन्निकृष्टेनतत्प्रेमयथादूरतरेभवेत् ॥ १८ ॥ सारूप्यंदीयमानंवासमा
नत्वाभिमानिनः ॥ नैरपेक्ष्यान्नगृह्णंतिभक्तास्तत्सेवनोत्सुकाः ॥१९॥ एकत्वंचापिकैवल्यंनवांछंतिकदाचन ॥ एवंचेत्तर्हिदासत्वंकस्वामित्वं
परस्यच ॥ २० ॥ निरपेक्षाश्चयेशांतानिर्वैराःसमदर्शिनः॥ आकैवल्याल्लोकपदग्रहणंकारणंविदुः ॥२१॥ नैरपेक्ष्यंमहानंदंनैरपेक्ष्याजनाहरेः॥
जानंतिहियथानासापुष्पामोदंनचक्षुषी ॥ २२ ॥ सकामाश्चतदानंदंजानंतिहिकथंनच ॥ रसकर्तायथाहस्तोरसस्वादुंनवेत्तिहि ॥ २३ ॥
तस्माद्राजन्भक्तियोगंविद्धिचात्यंतिकंपदम् ॥ भक्तानांनिरपेक्षाणांपद्धतिंकथयामिते॥२४॥स्मरणंकीर्तनंविष्णोःश्रवणंपादसेवनम् ॥ अर्चनं
वंदनंदास्यंसख्यमात्मनिवेदनम् ॥ २५ ॥ कुर्वंतिसततंराजन्भक्तियेप्रेमलक्षणाम् ॥ तेभक्तादुलर्भाभूमौभगवद्भावभावनाः ॥ २६ ॥ कुर्व
तोमहतांमानंदयांदीनेषुसर्वतः ॥ समानेषुतथामैत्रींसर्वभूतदयापराः ॥ २७ ॥ कृष्णपादाब्जमधुपाःकृष्णदर्शनलालसाः ॥ कृष्णंस्मरं
तिप्राणेशंयथाप्रोषितभर्तृकाः ॥ २८ ॥ श्रीकृष्णस्मरणाद्येषांरोमहर्षःप्रजायते ॥ आनंदाश्रुकलाश्चैववैवर्ण्यंतुक्वचिद्भवेत् ॥ २९ ॥ श्री
कृष्णगोविन्दहरेब्रुवन्तःश्लक्ष्णयागिरा ॥ अहर्निशंहरौलग्नास्तेहिभागवतोत्तमाः ॥ ३० ॥ ॥ इति श्रीमद्गर्गायार्यसंहितायां श्रीविज्ञानख
ण्डे ना०ब०सं०श्रीवेदव्यासोग्रसेनसंवादेनिर्गुणभक्तियोगवर्णनंनामतृतीयोऽध्यायः ॥ ३ ॥ ॥ श्रीव्यासउवाच ॥ ॥ खेवायौसलिलेव



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्लौमह्यांज्योतिर्गणेषुच ॥ श्रीकृष्णदेवंपश्यंतोहर्षिताश्चपुनःपुनः ॥ १ ॥ श्रीकृष्णोराधिकानाथःकोटिकंदर्पमोहनः ॥ तन्नेत्रगोचरोयाति
ब्रुवंच्छ्रीनंदनंदनः ॥ २ ॥ सदानंदंचतेदृष्ट्वाप्रहसंतिप्रहर्षिताः ॥ क्वचिद्रुदंतिधावंतिनंदंतिचवदन्तिच ॥ ३ ॥ क्वचिद्गायंतिनृत्यंतिक्वचित्तू
ष्णींभवंतिच ॥ कृष्णचंद्रस्वरूपास्तेकृतार्थावैष्णवोत्तमाः ॥ ४ ॥ तेषांदर्शनमात्रेणनरोयातिकृतार्थताम् ॥ नकालोनयमोयेषांदंडंदातुंन
चक्षमः ॥ ५ ॥ गदाकौमोदकीवामेदक्षिणेचसुदर्शनम् ॥ अग्रशार्ङ्गधनुःपश्चात्पांचजन्योघनस्वनः ॥ ६ ॥ नंदकश्चमहाखड्गःशतचंद्रेषवःशि
ताः ॥ एतान्यायुधमुख्यानितांश्चरक्षंत्यहर्निशम् ॥ ७ ॥ तेषामूर्ध्वंमहापद्मंछायांकर्तुंपुनःपुनः ॥ गरुडःपक्षवातेनश्रमहर्तासतामपि ॥ ८ ॥
यत्रयत्रगताःसंतस्तत्रतत्रस्वयंहरिः ॥ तीर्थीकुर्वन्भूमिभागंश्रीमत्पादाब्जरेणुभिः ॥ ९ ॥ क्षणंयत्रस्थिताःसंतस्तत्रतीर्थानिसंतिहि ॥ त
त्रकोपिमृतःपापीयातिविष्णोःपरंपदम् ॥ १० ॥ दूरात्संप्रेक्ष्यकृष्णेष्टान्नाधयोव्याधयस्तथा ॥ भूतप्रेतपिशाचाश्चपलायंतेदिशोदश ॥ ११ ॥
नद्योनदाःपर्वताश्चसमुद्राश्चतथापरे ॥ मार्गंददतिसाधुभ्योनिरपेक्षेभ्यएवच ॥ १२ ॥ साधूनांज्ञाननिष्ठानांविरक्तानांमहात्मनाम् ॥ अ
जातशत्रूणांतेषांप्रतिबंधोनकुत्रचित् ॥ १३ ॥ शतजन्मतपःपूतोभारतेयाज्ञिकःपुमान् ॥ संगंसलतेतेषांदुर्लभंपुण्यवर्जितैः ॥ १४ ॥ य
स्मिन्कुलेकृष्णभक्तोजायतेब्रह्मलक्षणः ॥ तत्कुलंविमलंविद्धिमलीमसमपिस्वतः ॥ १५ ॥ राजञ्छ्रीकृष्णभक्तस्तुपितॄन्दशकुलोद्भवान् ॥
प्रियापक्षेपिदशचमातृपक्षेतथादश ॥ १६ ॥ पुरुषानुद्धरेद्राजन्निरयात्पापबंधनात् ॥ साधुसंबंधिनश्चान्येभृत्याद्याश्चसुहृज्जनाः ॥ १७ ॥
शत्रवोभारवाहाश्चतद्गृहेपाक्षिणस्तथा ॥ पिपीलिकाश्चमशकास्तथाकीटपतंगकाः ॥ १८ ॥ सांख्ययोगंविनाराजंस्तीर्थधर्ममखैर्विना ॥
साधुसंसर्गतस्तेपिप्रयांतिहरिमंदिरम् ॥ १९ ॥ अब्रह्मण्येकृष्णसारेसौवीरेकीटकेतथा ॥ म्लेच्छदेशेपिदेवेशभक्तोलोकान्पुनातिहि ॥ २० ॥
इत्थंश्रीकृष्णभक्तानांमाहात्म्यंकथितंमया ॥ चतुःपदार्थदातॄणांकिंभूयःश्रोतुमिच्छसि ॥ २१ ॥ ॥ उग्रसेनउवाच ॥ ॥ परिपूर्णतमेसा
क्षाच्छ्रीकृष्णेपरमात्मनि ॥ दंतवक्रस्यदुष्टस्यज्योतिर्लीनंबभूवह ॥ २२ ॥ अहोमहदिदंचित्रंसायुज्यंमहतामपि ॥ योग्यंस्याद्विप्रमुख्येंद्र
कथंचानेनशत्रुणा ॥ २३ ॥ ॥ श्रीव्यासउवाच ॥ ॥ ममाहमितिवैषम्यंभूतानांत्रिगुणात्मनाम् ॥ क्रोधाद्यैर्वर्ततेराजन्नहरौपरमात्मनि ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ २४ ॥ हरौकेनापिभावेनमनोलग्नंकरोतियः ॥ यातितद्रूपतांसोपिभृंगिणःकीटकोयथा ॥ २५ ॥ स्नेहंकामंभयंक्रोधमैक्यंसौहृदमेवच ॥
कृत्वातन्मयतांयांतिसांख्ययोगंविनाजनाः ॥ २६ ॥ स्नेहान्नंदयशोदाद्यावसुदेवादयोऽपरे ॥ कामाद्गोप्योहरिंप्राप्तानतुब्रह्मतयानृप ॥ २७ ॥
तद्रूपगुणमाधुर्यभावसंलग्नमानसाः ॥भयात्कंसस्तवसुतस्तत्सायुज्यंजगामह ॥ २८ ॥ क्रोधादयंदंतवक्रःशिशुपालादयोऽपरे ॥ ऐक्याच्चयाद
वायूयंसौहृदाच्चवयंयथा ॥२९॥ तस्मात्केनाप्युपायेनमनःकृष्णेनिवेशयेत् ॥ अहर्निशंहिस्मरणंभवेच्छत्रोर्नकस्यचित् ॥ शत्रुभावंहरौतस्मा
त्कुर्वंतितनुजादयः ॥ ३० ॥ ॥ इति श्रीमद्गर्गाचार्यसंहितायांविज्ञानखण्डेश्रीव्यासोग्रसेनसंवादेभक्तमाहात्म्यंनामचतुर्थोऽध्यायः ॥ ४ ॥
॥ श्रीवेदव्यासउवाच ॥ ॥ वत्साघधेनुकबकीबककेशिकालारिष्टप्रलंबकपिबल्वलशंखशाल्वाः ॥ वैरेणयंकिमुतभक्तियुतानरेंद्रप्रापुःपरं
प्रकृतिपूरुषयोःपुमांसम् ॥ १ ॥ पूर्वासुरावातिबलौमधुकैटभाख्यौस्वर्णाक्षहेमकशिपूचतथापरौच ॥ वैरंविधायनृपरावणकुंभकर्णौविष्णोःकि
लापतुरलंपरमंपदंहि ॥ २ ॥ केकेनविष्णुपदमागतवंतआदौप्रह्लादबाणबलियक्षविभीषणाद्याः ॥ तत्संगिसंगनिरताबहुमानपात्राःश्रीमत्प
दाब्जमकरंदरजोधिलुब्धाः ॥ ३ ॥ देवर्षिगीष्पतिवसिष्ठपराशराद्याःसांख्यायनासितशुकाःसनकादयश्च ॥ निष्कारणाभुविचरंत्यरविंदने
त्रपादारविंदमकरंदमिलिंदमुख्याः ॥ ४ ॥ यत्युत्कलांगभरतार्जुनमैथिलाश्चगाधिप्रियव्रतयदुप्रमुखांबरीषाः ॥ निष्कारणाःपरमहंसवराश्च
रंतिश्रीकृष्णचंद्रचरितामृतपानमत्ताः ॥ ५ ॥ मंदोदरीचशबरीचमतंगशिष्यातारातथाऽत्रिवनितानिपुणात्वहल्या ॥ कुंतीतथाद्रुपदराज
सुतासुभक्ताएताःपरंपरमहंससमाःप्रसिद्धाः ॥ ६ ॥ सुग्रीववालिसुतवातसुतर्क्षराजनागारिगृध्रवरकाकभुशुंडिमुख्याः ॥ कुब्जादिवायकसु
दामगुहादयोन्येतत्संगमेत्यहरिभक्तवराबभूवुः ॥ ७ ॥ कृष्णंनरोधयतिधर्मतपोनयोगःसांख्यंनयज्ञउततीर्थयमव्रतानि ॥ छंदांसिपूर्तनिय
मोचनदक्षिणाचनेष्टंनदानमथभक्तिमृतेनकश्चित् ॥ ८ ॥ यज्ञव्रताध्ययनतीर्थतपोनियोगैरिष्टस्वधर्मनियमादिकसांख्ययोगैः ॥ यत्प्राप्यते
तदखिलंभवतीहभक्त्याभक्तेःपदंहिकर्हिचिन्नभवेत्किलेभिः ॥ ९ ॥ उद्धारिणीयमधमस्यचविश्वपापादुत्तारिणीभवमहार्णववारिवेगात् ॥
संहारिणीविषयसंचितकर्मणांचसत्कारिणीहरिपदस्यपरात्परस्य ॥ १० ॥ श्रीकृष्णदर्शनरसोत्सुकभावराजदुद्यद्वसंतपरमोत्सवपंचमीयम् ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिव्यालतातिफलपल्लवभारनम्रासंराजतेहिसततंकुसुमाकरस्य ॥११॥ संमोहकालघनमध्यतडित्स्फुरंतीशास्त्रार्थदर्शवचसांपददीपिकेयम् ॥
दीपावलिर्विजयतेजयकार्तिकस्यजेतुंगुणान्विजयिनोदशमीजयस्य ॥ १२ ॥ सांख्यंचयोगइतिपार्श्वगतेहिदंडेकीलानिचात्रशतशोगुण
भावभेदाः ॥ अस्याःक्रमान्नवकथाश्रवणादयश्चश्रेणीयमस्तिसरलाभगवत्पदस्य ॥ १३ ॥ इ०ग०सं०श्रीविज्ञा०व्यासोग्रसेनसंवादेभक्त्यु
त्कर्षवर्णनंनामपंचमोऽध्यायः ॥ ५ ॥ ॥ उग्रसेनउवाच ॥ ॥ कर्मग्रहोगृहस्थोयंश्रीकृष्णस्यमहात्मनः ॥ सेवाँवैकेनविधिनाकुर्यात्तद्ब्रूहि
मेमुने ॥ १ ॥ भक्त्यंकुरोयस्यनास्तिवास्तितस्यनवर्द्धते ॥ तस्यकेनप्रकारेणप्रसन्नःस्याद्धरिःस्वयम् ॥ २ ॥ ॥ श्रीव्यासउवाच ॥ ॥ य
दिभक्त्यंकुरोनस्यात्सत्संगेनप्रजायते ॥ बलाद्विवर्द्धतेतस्मात्सतांसंगंसमाचरेत् ॥ ३ ॥ कृष्णसेवाविधिंतुभ्यंवक्ष्यामिसुलभंपरम् ॥ ययागृ
हस्थोयंशीघ्रंश्रीकृष्णंप्राप्नुयान्नृप ॥ ४ ॥ आचार्य्यंकुलसम्भूतंश्रीकृष्णध्यानतत्परम् ॥ एतादृशंगुरुंकृत्वासिद्धोभवतिमानवः ॥ ५ ॥ वि
ष्णुदीक्षाविहीनस्यश्राद्धसङ्कल्पएवच ॥ यज्ञोदानंतपस्तीर्थंसर्वंभवतिनिष्फलम् ॥ ६ ॥ विष्णुसेवाधिकारोस्यकथंभवतिपार्थिव ॥ निर्गु
रोर्दर्शनंकृत्वाहतपुण्योभवेन्नरः ॥ गुरोःसेवाविधिंशिक्षेच्छ्रीकृष्णस्यमहात्मनः ॥ ७ ॥ उत्तराभिमुखंशश्वत्कारयेद्धरिमंदिरम् ॥ तत्रसिंहा
सनंप्रोच्चंसपीठंकुम्भमण्डितम् ॥ ८॥ सच्चिदानन्दनामस्यात्सोपानत्रयभूषितम् ॥ महार्हवस्त्रैराच्छन्नंतत्रतूल्यासनंमृदु ॥ ९॥ पार्श्वोपबर्ह
णावीतंस्फुरद्धेमांबरावृतम् ॥ नानाचित्रयुतैःकुड्यैरन्तःपटसमन्वितैः ॥ १० ॥ सर्वतोमण्डलैस्तद्वत्तोरणैःसमलंकृतम् ॥ गवाक्षवारियन्त्रा
ढ्यंचतुःशालसुजालकैः ॥ ११ ॥ राजेतप्राङ्गणोद्देशःसभामण्डपमण्डलैः ॥ तत्रप्राङ्गणमध्येतुतुलसीमन्दिरंशुभम् ॥ १२ ॥ मन्दिरस्यब
हिर्द्वारिकारयेच्चद्विपद्वयम् ॥ तथावैकृतिमंराजन्सिंहद्वयमधिष्ठितम् ॥ १३ ॥ सुवर्णशिखरस्याधश्चक्रंचशिखरोपरि ॥ द्वारेपिहरिनामानिप्रा
लेख्यानिशुभानिच ॥ १४ ॥ शंखंपद्मंगदांशार्ङ्गंमालेख्यंभित्तिपार्श्वयोः ॥ इषुधीचतथाबाणाःसव्येदक्षिणएवच ॥ १५ ॥ तथामंदिरपृष्ठे
वैशतचंद्रंचनंदकम् ॥ हलंचमुसलंचैवलेखनीयंप्रयत्नतः ॥ १६ ॥ सिंहासनस्यपृष्ठेतुगोप्योगावस्तथैवच ॥ गोपालास्तत्रसोपानेकपाटेविज
योजयः ॥ १७ ॥ देहल्यांकल्पवृक्षश्चस्तंभेषुचलताःशुभाः ॥ यत्रतत्रचकुड्येषुश्रीगंगापापहारिणी ॥ १८ ॥ वृंदावनंगोवर्द्धनंयमुनापु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लिनानिच॥तथावैचीरहरणमालेख्यंरासमंडलम्॥१९॥चित्रकूटःपंचवटीलेखनीयंप्रयत्नतः॥रामरावणयोर्युद्धंजानकीहरणंविना ॥२०॥ दशाव
तारचित्राणिनरनारायणाश्रमः॥सप्तपुर्य्यस्त्रयोग्रामानवारण्यंनवोषराः ॥२१॥ एवंलिखित्वाचित्राणिमंदिरंकारयेद्बुधः ॥ वंशीभावोद्यतकरंवक्री
भूतांघ्रिदक्षिणम् ॥२२॥किशोराकृतिकृष्णस्यरूपंसेव्यतमंस्मृतम्॥तत्प्रतिष्ठांविधायाशुगुरुहस्तेनमंदिरे २३ भक्तःपरमयाभक्त्यास्थापयेत्त
त्परोभवेत्॥तत्प्रसादेचरसनांघ्राणंतत्तुलसीदले॥न्यसेत्कर्णौतच्छ्रवणएवंसेवापरोभवेत् ॥२४॥ अहर्निशंकृष्णसेवांयःकरोतिचभाववित् ॥ तं
प्रेमलक्षणंभक्तंविदुर्भागवतोत्तमम्॥२५॥अश्वमेधसहस्राणिराजसूयशतानिच॥राजञ्छ्रीकृष्णसेवायाःकलांनार्हंतिशोडशीम् ॥२६ ॥श्रीकृष्ण
देशिकस्यापियःकुर्याद्दर्शनंनरः॥कोटिजन्मकृतैःपापैर्मुच्यतेनात्रसंशयः ॥ २७ ॥ देहांतेतंसमानेतुंश्यामसुंदरविग्रहाः ॥रथंनीत्वाप्रधावंतिगो
लोकात्कृष्णपार्षदाः ॥ २८ ॥ इति श्रीमद्गर्गाचार्यसंहितायांश्रीविज्ञानखंडेनारदबहुलाश्वव्यासोग्रसेनसंवादेहरिमंदिरप्रतिष्ठावर्णनंनामषष्ठोऽ
ध्यायः॥६॥ श्रीवेदव्यासउवाच॥ ॥ब्राह्मेमुहूर्तेचोत्थायकशिपोश्चमुदानृप ॥ गुरोर्नामचगोविंदनामानिप्रवदन्मुहुः ॥१॥ भूमिंनत्वान्यसेत्पादं
जलंस्पृष्ट्वाहरेर्जनः ॥ उपविश्यासनेशीघ्रंसकामोयोयथासुखम् ॥ २ ॥ हस्तावुत्संगआधायश्वासजिद्ध्यानमास्थितः ॥ ज्ञानमुद्राधरंशां
तंश्रीगुरुंस्वस्तिकासमम् ॥ ३ ॥ ध्यात्वाकृष्णंपरंध्यायेद्भक्तएकाग्रमानसः ॥ किशोरंश्यामलंहृद्यंवंशीवेत्रविभूषितम् ॥ ४ ॥ एवंकृत्वाहरे
र्ध्यानंपुनर्गच्छेद्बहिःस्थलम् ॥ तच्छौचंशृणुराजेन्द्रगृहस्थस्ययथातथम् ॥ ५ ॥ अश्वक्रांतेतिमंत्रेणमृत्स्नयाचजलेनच ॥ एकालिंगेगुदेतिस्र
स्तथावामकरेदश ॥ ६ ॥ उभयोर्हस्तयोःसप्ततिस्रस्तिस्रःपदेपदे ॥ एतद्द्विगुणंप्रोक्तंब्रह्मचारिवनस्थयोः ॥ ७ ॥ यतेश्चतुर्गुणंरात्रौतदर्ध
शौचमाचरेत् ॥ तदर्धंरोगिपांथानांस्त्रीशूद्राणांतदर्धकम् ॥ ८ ॥ शौचकर्मविहीनस्यसकलानिष्फलाःक्रियाः ॥ मुखशुद्धिविहीनस्यमंत्रा
नफलादाःस्मृताः ॥ ९ ॥ आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ॥ ब्रह्मप्रज्ञांचमेधांचत्वन्नोदेहिवनस्पते ॥ १० ॥ इतिमंत्रंसमुच्चार्यकुर्य्या
द्दैदंतधावनम् ॥ कण्टकीक्षीरिकापांसनिर्गुण्डीब्रह्मवृक्षकान् ॥ ११ ॥ वटैरण्डविगन्धाद्यान्वर्जयेद्दन्तधावने ॥ हरितहयमंत्रेणसूर्यंनत्वा
कृतांजलिः ॥ १२ ॥ प्रणमेद्धरिभक्तांश्चप्रह्लादादीन्समाहितः ॥ तुलसीमृत्तिकांनीत्वाततःस्नानंसमाचरेत् ॥ १३ ॥ पठितव्यंप्रयत्नेन



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगंगायमुनाष्टकम् ॥ अयोध्यामथुरामायाकाशीकांचीअवंतिका ॥ पुरीद्वारावतीचैवसप्तैतामोक्षदायकाः ॥ १४ ॥ शालिग्रामोमहायोगे
शंभलोहरिमंदिरे ॥ नंदिग्रामःकोसलेतुत्रयोग्रामाःप्रकीर्तिताः ॥ १५ ॥ दंडकंसैंधवारण्यंजंबूमार्गंचपुष्करम् ॥ उत्पलावर्तमारण्यंनैमिषंकु
रुजांगलम् ॥ १६ ॥ अर्बुदंहेमवंतंचनवारण्यानिवैविदुः ॥ एतानितीर्थनामानिसमुच्चार्यपुनःपुनः ॥ १७ ॥ इत्थंस्नात्वाततोबिभ्रदंबरंक्षौममु
त्तमम् ॥ द्वादशान्तिलकान्बिभ्रदष्टमुद्राधरःपरः ॥ १८ ॥ कृतसंध्यःशुचिर्मौनीगत्वाश्रीकृष्णमंदिरम् ॥ घंटानादंजयारावंतलशब्दंविधाय
च ॥ १९ ॥ उत्तिष्ठोत्तिष्ठगोविंदयोगनिद्रांविहायच ॥ उक्त्वापीमांस्मृतिंराजन्भक्तउत्थापयेद्धरिम् ॥ २० ॥ मंगलार्तिक्यमादायभ्रामयंस्त
न्मुखोपरि ॥ निवेद्यबहुपक्वान्नंनत्वानत्वापुनःपुनः ॥ २१ ॥ ततःस्नानंकारयित्वादेशकालप्रभाववित् ॥ शृंगारंभाववित्कृत्वावस्त्रभूषण
मंगलैः ॥ २२ ॥ आर्तिक्यंतुततःकृत्वाभोगान्पंचविधायच ॥ ततोधृत्वामहाभोगंनानारसमयंपरम् ॥ २३ ॥ राजभोगार्तिकंकृत्वाकारये
च्छयनंहरेः ॥ ततःप्रसादंपरमंतुलसीगंधमिश्रितम् ॥ २४ ॥ भुंजीतयोहरेर्नित्यंसकृतार्थोनसंशयः ॥ राजभोगार्तिकंकृत्वाकारयेच्छयनंह
रेः ॥ २५ ॥ चतुर्घट्यवशेषेतुदिनेउत्थापयेद्धरिम् ॥ शंखनादेनविधिवद्भोगंधृत्वायथातथम् ॥ २६ ॥ ततःसंध्यार्तिकंकृत्यादुग्धादीनि
निवेद्यच ॥ ततःप्रदोषसमयेपुनरार्तिक्यमाचरेत् ॥ २७ ॥ धृत्वाभोगंपरंमिष्टंकारयेच्छयनंहरेः ॥ राजसेचैवराजेंद्रराजसेवेयमस्तिवै ॥
॥ २८ ॥ एवंश्रीकृष्णचंद्रस्यसेवासंलग्नमानसः ॥ तारयित्वाकुलशतंयातिचात्यंतिकंपदम् ॥ २९ ॥ कृष्णजन्माष्टमीचैवश्रीरामनवमीत
था ॥ राधाष्टम्यन्नकूटश्चद्वादशीवामनस्यच ॥ ३० ॥ चतुर्दशीनृसिंहस्यतथानंतचतुर्दशी ॥ एषुकालेषुकृष्णस्यमहापूजांसमाचरेत् ॥
॥ ३१ ॥ इति श्रीमद्गर्गाचार्यसंहितायांविज्ञानखण्डेव्यासोग्रसेनसंवादेराजसेवावर्णनंनामसप्तमोऽध्यायः ॥ ७ ॥ ॥ व्यासउवाच ॥ ॥ अ
थस्नात्वाचकृत्वाथनित्यनैमित्तिकींक्रियाम् ॥ पंचवर्णसमायुक्तंशुद्धेस्थंडिलमंडले ॥ १ ॥ द्वात्रिंशद्दलसंयुक्तंकर्णिकाकेसरोज्ज्वलम् ॥ विधा
यकमलंदिव्यंविधिवद्वेदसूक्तिभिः ॥ २ ॥ कर्णिकायांन्यसेद्राजन्हरेःसिंहासनंशुभम् ॥ तत्रराधांरमांस्थाप्यभूदेवींविरजांतथा ॥ ३ ॥ तन्म
ध्येस्थापयेत्साक्षाच्छ्रीकृष्णंपुरुषोत्तमम् ॥ तथाष्टदलमध्येतुराधिकाष्टसखीःशुभाः ॥ ४ ॥ ततोष्टदलमध्येतुश्रीकृष्णस्यतथासखीन् ॥ त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थाषोडशपर्णेषुसखीनांचद्वयंद्वयम् ॥ ५ ॥ कमलस्यचपार्श्वेषुशंखंचक्रंगदांतथा ॥ पद्मंचनंदकंशार्ङ्गंबाणांश्चमुसलंहलम् ॥६॥ कौस्तुभंवनमालांचश्रीवत्संनीलमंबरम् ॥ पीतांबरंतथावंशींवेत्रंचस्थापयेद्बुधः ॥ ७ ॥ ततःपार्श्वेषुतालांकंगरुडांकंरथंतथा ॥ सुमतिंदारुकंसूतंगरुडंकुमुदंतथा ॥ ८ ॥ नंदंसुनंदंचंडंचप्रचंडंचमहाबलम् ॥ कुमुदाक्षंबलंचैवस्थापयेद्यत्नतःसुधीः ॥ ९ ॥ तथादिक्षुचदिक्पालान्संस्थाप्यचपृथक्पृथक् ॥ विष्वक्सेनंशिवंमांचविधिंदुर्गांविनायकम् ॥ १० ॥ नवग्रहांश्चवरुणंतथाषोडशमातृकाः ॥ तत्पद्माग्रेवीतिहोत्रंस्थंडिलेस्थापयेद्बुधः ॥ ११ ॥ आवाहनमासनंचपाद्यमर्घ्यंविशेषतः ॥ स्नानंचमधुपर्कंचधूपंदीपंतथैवच ॥ १२ ॥ यज्ञोपवीतंवस्त्रंचभूषणंगंधमेवच ॥ पुष्पंतथाक्षतांश्चैवनैवेद्यंचमनोहरम् ॥ १३ ॥ जलमाचमनंचैवतांबूलंदक्षिणांतथा ॥ प्रदक्षिणांप्रार्थनांचतथानीराजनंस्मृतम् ॥ १४ ॥ नमस्कारंततःकुर्यात्क्रमेणचपृथक्पृथक् ॥ आवाहनेतुपुष्पाणिआसनेतुकुशद्वयम् ॥ १५ ॥ पाद्येश्यामाचदूर्वाचविष्णुक्रांतातथैवच ॥ सौगंधिकानिपुष्पाणिह्यर्घेयोग्यानियादव ॥ १६ ॥ चंदनोशीरकर्पूरकुंकुमागुरुमिश्रितम् ॥ एतादृशंजलंयोग्यंस्नानेराजन्महामते ॥ १७ ॥ मधुपर्केह्यामलकमरविंदंतथामतम् ॥ धूपेगंधाष्टकंदेयंदीपेकर्पूरमेवच ॥ १८ ॥ यज्ञोपवीतंपीतंचवस्त्रेपीतांबरंमतम् ॥ भूषणेचैवसौवर्णंगंधेकुंकुमचंदने ॥ १९ ॥ तुलसीमंजरीपुष्पेऽक्षतेषुशालितंडुलाः ॥ नैवेद्येतुरसाःषट्चभोगानानाविधामताः ॥ २० ॥ जलेगंगाजलंयोग्यंयमुनाजलमेवच ॥ जातीफलंचकंकोलंमतमाचमनेनृप ॥ २१ ॥ तांबूलेचोषणंत्वेलादक्षिणायांतुहाटकम् ॥ प्रदक्षिणायांभ्रमणंघृतंनीराजनेगवाम् ॥ २२ ॥ प्रार्थनायांहरेर्भक्तिःप्रेमलक्षणसंयुता ॥ नमस्कारेमहाराजसाष्टांगनतविग्रहः ॥ २३ ॥ द्वादशाक्षरमंत्रेणशिखांबद्धाशुचिःपुमान् ॥ उपचारान्पुरस्कृत्यश्रीमुखेसंमुखोभवेत् ॥ २४ ॥ इति श्रीमद्ग०सं०वि०खंडे व्यासोग्रसेनसंवादेमहापूजाविधिवर्णनंनामाष्टमोऽध्यायः ॥८॥ श्रीव्यासउवाच ॥ उपचारस्यमन्त्राणिवेदोक्तानिशुभानिच ॥ तुभ्यंवक्ष्यामिराजेंद्रशृणुष्वैकाग्रमानसः ॥ १ ॥ अथावाहनम् ॥ गोलोकधामाधिपतेरमापतेगोविंददामोदरदीनवत्सल ॥ राधापतेमाधवसात्वतांपतेसिंहासनेस्मिन्ममसंमुखोभव ॥ २ ॥ अथासनम् ॥ श्रीपद्मरागस्फुरदूर्ध्वपृष्ठंमहार्हवैडूर्यखचित्पदाब्जम् ॥ वैकुण्ठवैकुण्ठपतेगृहाणपीठंतडिद्धाटककुम्भखण्डम् ॥ ३ ॥ ॥ अथपाद्यम् ॥ ॥ परं



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थितंनिर्मलरौक्मपात्रेसमाहृतंबिंदुसरोवराद्धि ॥ योगेशदेवेशजगन्निवासगृहाणपाद्यंप्रणमामिपादौ ॥ ४ ॥ ॥ अथार्घ्यम् ॥ ॥ जलजचम्प
कपुष्पसमन्वितंविमलमर्घ्यमनर्घ्यदरस्थितम् ॥ प्रतिगृहाणरमारमणप्रभोयदुपतेयदुनाथयदूत्तम ॥ ५ ॥ अथस्नानम् ॥ काश्मीरपाटीर
विमिश्रितेनसुमल्लिकोशीरवताजलेन ॥ स्नानंकुरुत्वंयदुनाथदेवगोविन्दगोपालकतीर्थपाद ॥ ६ ॥ ॥ अथमधुपर्कस्नानम् ॥ ॥ मध्याह्न
चण्डार्कभवश्रमापहंसितांगसंपर्कमनोहरंपरम् ॥ गृहाणविष्णोमधुपर्कमाहृतंसंदृश्यपीताम्बरसात्वतांपते ॥ ७ ॥ ॥ अथवस्त्रम् ॥ ॥ वि
भोसर्वतःप्रस्फुरत्प्रोज्ज्वलंचस्फुरद्रश्मिशून्यंपरंदुर्लभञ्च ॥ स्वतोनिर्मितंपद्मकिंजल्कवर्णंगृहाणांबरंदेवपीताम्बराख्यम् ॥ ८ ॥ ॥ अथय
ज्ञोपवीतम् ॥ सुवर्णाभमापीतवर्णंसुमन्त्रैःपरंप्रोक्षितंवेदविन्निर्मितञ्च ॥ शुभम्पञ्चकार्येषुनैमित्तिकेषुप्रभोयज्ञयज्ञोपवीतंगृहाण ॥ ९ ॥ ॥ अ
थभूषणम् ॥ ॥ कनकरत्नमयंमयनिर्मितंमदनरुक्कदनंसदनंरुचाम् ॥ उषसिपूषसवर्णविभूषणंसकललोकविभूषणगृह्यताम् ॥ १० ॥ ॥
अथगंधम् ॥ ॥ शंखेंदुशोभंबहुमङ्गलंश्रीकाश्मीरपाठीरकपंकपृक्तम् ॥ सुमण्डनंगन्धचयंगृहाणसमस्तभूमण्डलभारहारिन् ॥ ११ ॥
अथाक्षतान् ॥ ॥ ब्रह्मावर्तेब्रह्मणापूर्वमुक्तान्ब्राह्मैस्तोयैःसिंचितान्विष्णुनाच ॥ रुद्रेणारादक्षिताञ्चाक्षसेभ्यःसाक्षाद्भूमन्नक्षतांस्त्वंगृहाण ॥
॥ १२ ॥ ॥ अथपुष्पाणि ॥ मन्दारसंतानकपारिजातकल्पद्रुमश्रीहरिचंदनानाम् ॥ गृहाणपुष्पाणिहरेतुलस्यामिश्राणिसाक्षान्नवमंजरीभिः॥
॥१३॥ ॥ अथधूपम् ॥ ॥ लवङ्गपाटीरजचूर्णमिश्रंमनुष्यदेवासुरसौख्यदञ्च ॥ सद्यःसुगन्धीकृतहर्म्यदेशंद्वारावतीभूपगृहाणधूपम् ॥ १४ अ
थदीपम् ॥ ॥ तमोहारिणंज्ञानमूर्तिमनोज्ञंलसद्वर्तिकर्पूरपूरंगवाज्यम् ॥ जगन्नाथदेवप्रभोविश्वरूपस्फुरज्ज्योतिषंदीपमुख्यंगृहाण ॥ १५ ॥
अथनैवेद्यम् ॥ रसैःशरैर्भेदविधिव्यवस्थितंरसैरसाढ्यंचयशोमतीकृतम् ॥ गृहाणनैवेद्यमिदंसुरोचिकंगव्यामृतंसुन्दरनन्दनन्दन ॥ १६ ॥
॥ अथजलम् ॥ ॥ गंगोत्तरीवेगबलात्समुद्धृतंसुवर्णपात्रेणहिमांशुशीतलम् ॥ सुनिर्मलाभंह्यमृतोपमंजलंगृहाणराधावरभक्तवत्सल ॥ १७ ॥
अथाचमनम् ॥ ॥ राधापतेश्रीविरजापतेप्रभोश्रियःपतेसर्वपतेचभूपते ॥ कंकोलजातीफलपुष्पवासितंपरंगृहाणाचमनंदयानिधे ॥ १८ ॥
॥ अथताम्बूलम् ॥ ॥ जातीफलैलासुरपुष्पयुक्तंयाविन्त्रिपूगीफलपत्रवृन्दम् ॥ मुक्तासुधाखादिरसारयुक्तंगृहाणताम्बूलमिदंरमेश ॥ १९ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथदक्षिणा ॥ ॥ नाकपालवसुपालमौलिभिर्वंदितांघ्रियुगलप्रभोहरे ॥ दक्षिणांपरिगृहाणमाधवलोकदक्षवरदक्षिणापते ॥ २० ॥ ॥ अथप्रदक्षिणा ॥ ॥ समस्ततीर्थयज्ञदानपूर्तकादिजंफलम् ॥ लभेत्परस्यशाश्वतंकरोतियःप्रदक्षिणाम् ॥ २१ ॥ ॥ अथनीराजनम् ॥ ॥ प्रस्फुरत्परमदीप्तिमंगलंगोघृताक्तनवपञ्चवर्तिकम् ॥ आर्तिकंपरिगृहाणचार्तिहन्पुण्यकीर्तिविशदीकृतावने ॥ २२ ॥ ॥ अथप्रार्थना ॥ हरेमत्समःपातकीनास्तिभूमौतथात्वत्समोनास्तिपापापहारी ॥ इतित्वंचमत्वाजगन्नाथदेवयथेच्छाभवेत्तेतथामांकुरुत्वम् ॥ २३ ॥ ॥ नमस्कारः ॥ ॥ नमोस्त्वनन्तायसहस्रमूर्तयेसहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्नेपुरुषायशाश्वतेसहस्रकोटीयुगधारिणेनमः ॥ २४ ॥ ॥ अथस्तुतिः ॥ संज्ञानमात्रंसदसत्परंमहच्छश्वत्प्रशांतंविभवंसमंमहत् ॥ त्वांब्रह्मवंदेहिसुदुर्गमंपरंसदास्वधाम्नापरिभूतकैतवम् ॥ २५ ॥ एवंसंपूज्यदेवेशमेभिर्मंत्रैर्महामते ॥ प्रणम्यविष्णुंसर्वांगपूजांकुर्यात्प्रयत्नतः ॥ २६ ॥ ॐ नमोनारायणायपुरुषायमहात्मने ॥ विशुद्धसत्वधिष्ण्यायमहाहंसायधीमहि ॥ २७ ॥ इतिमंत्रेणप्राणायामंकृत्वा ॥ ॥ ॐ विष्णवे मधुसूदनाय वामनाय त्रिविक्रमाय श्रीधराय हृषीकेशाय पद्मनाभाय दामोदराय संकर्षणाय वासुदेवाय प्रद्युम्नाय अनिरुद्धाय अधोक्षजाय पुरुषोत्तमाय श्रीकृष्णाय नमः ॥ इतिपादगुल्फजानूरुकट्युदरपार्श्वपृष्ठभुजाकन्धरकर्णनासिकाधरनेत्रशिरस्सुपृथक्पृथक्पूजयामीतिसर्वांगपूजांकुर्यात् ॥ तथासखीसखशंखचक्रगदापद्मासिधनुर्बाणहलमुसलादीन् ॥ तथाकौस्तुभवनमालाश्रीवत्सपीताम्बरनीलाम्बरवंशीवेत्रादीन् ॥ तथातालांकगरुडांकरथदारुकसुमतिसारथिगरुडकुमुदनन्दसुनन्दचण्डमहाबलकुमुदाक्षाबलादीन् ॥ प्रणवपूर्वेणचतुर्थ्यंतेननमःसंयुक्तेननाम्नातथाविष्वक्सेनाशिवरमाविधिदुर्गाविनायकदिक्पालवरुणनवग्रहमातृकादीन्मंत्रैःपूजयेत् ॥ पुनःपरिसमूहनादिस्थालीपाकविधानेनवैश्वानरंसंपूज्य ॥ ॐ नमोवासुदेवायनमः संकर्षणायच ॥ प्रद्युम्नायानिरुद्धायसात्वतांपतयेनम ॥ २८ ॥ इति मंत्रेणशतमाहुतीर्जुहुयात् ॥ देवंप्रदक्षिणीकृत्यमहाभोगंनिधायच ॥ प्रणमेद्दंडवद्भूमौमंत्रमेतदुदीरयेत् ॥ २९ ॥ ध्येयंसदापरिभवघ्नमभीष्टदोहंतीर्थास्पदंशिवविरंचिनुतंशरण्यम् ॥ भृत्यार्तिहन्प्रणतपालभवाब्धिपोतंवंदेमहापुरुषतेचरणारविंदम् ॥ ३० ॥ इतिनत्वाहरिंराजन्पुनर्नीराजनंहरेः ॥ कारयेद्विधिवद्भक्तोहरिभक्तजनैःसह ॥ ३१ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घंटावाद्यरणद्वंटाकांस्यवीणादिकीचकैः ॥ करतालमृदंगाद्यैःकीर्तनंकारयेद्बुधः ॥ ३२ ॥ नृत्यंतिश्रीहरेरग्रेभक्तावैप्रेमविह्वलाः ॥
जयध्वनिसमायुक्ताःसत्कथागानतत्पराः ॥ ३३ ॥ पुनःप्रभुंनमस्कृत्यमंदिरेशयनोज्ज्वले ॥ शयनंकारयेत्सम्यच्छ्रीकृष्णस्यमहात्मनः ॥
॥ ३४ ॥ एवंकरोतिश्रीकृष्णसेवांयोलग्नमानसः॥प्रणमंतिचतंराजन्देवताःस्वर्गसंभवाः ॥३५॥ सोपिराजेंद्रनाकेपिपदंधृत्वाहरेर्जनः॥अंतेयाति
परंधामगोलोकंयोगिदुर्लभम् ॥३६॥इतिश्रीकृष्णसेवायाविधानंवर्णितंमया॥चतुष्पदार्थदंनृणांकिंभूयःश्रोतुमिच्छसि ॥३७॥ इतिश्रीमद्दुर्गा०
सं० विज्ञानखंडेव्यासोग्रसेनसंवादेपूजनप्रकारवर्णनंनामनवमोऽध्यायः ॥९॥ उग्रसेनउवाच ॥ सिद्धोस्म्यनुगृहीतोस्मित्वयाश्रीकृष्णरूपिणा ॥
श्रीकृष्णपद्धतिःसाक्षाच्छ्रुतावैविधिवन्मया ॥ १ ॥ अहोलोकामहामूढालोभमोहमदान्विताः ॥नाप्नुवंतिहिवैराग्यंभजंतिनहरिंक्वचित् ॥२॥ भ
गवन्नस्यजगतोमोहकारणमद्भुतम् ॥कथंजातंवदविभोकथमेतन्निवर्तते॥३॥ व्यासउवाच ॥ यथांभसिप्राप्तमदोविधोःस्वतस्तत्प्रेंखतेकेवलमेव
वेगतः ॥तथाहिबिंबःपरमस्यमाययाममेत्यहंभावगतेःप्रवर्तते ॥४॥ प्रधानकालाशयदेहजैर्गुणैःकुर्वन्विकर्माणिजनोनिबद्ध्यते ॥ काचेर्भकंसै
कतएवजीवनंगुणेचसर्पप्रतनोतिसोक्षिभिः ॥ ५ ॥ राजञ्जगन्मोहमयंरजोमयंतमोमयंसत्वमयंतथाक्वचित् ॥ मनोविलासंविकृतंचविभ्रमंवि
द्ध्याश्विदंलोलमलातचक्रवत् ॥ ६ ॥ इदंकरिष्यामिकरोम्यभूवंममेदमस्तीतितवेदमाब्रुवन् ॥ अहंसुखीदुःखयुतःसुहृज्जनोलोकस्त्वहंकारवि
मोहितोमतः ॥ ७ ॥ उग्रसेनउवाच ॥ वदमेकृपयाब्रह्मल्लँक्षणंपरमात्मनः ॥ कतिधाकवयःकृष्णंवदंतिजयवर्त्मभिः ॥ ८ ॥ श्रीव्यासउवाच ॥
सनातनस्यात्रनमृत्युजन्मनीनशोकमोहौनजरायुवादयः ॥ अहंमदोव्याधियुतोभयंसुखंशुचःक्षुधेच्छानरतिर्नचाधयः ॥ ९ ॥ आत्मानिरी
होह्यतनुःससर्वगोनाहंकृतिःशुद्धमयोगुणाश्रयः ॥ स्वयंपरोनिष्फलआत्ममंगलोज्ञानात्मकोयोविदितोमुनीश्वरैः ॥ १० ॥ जागर्तियोस्मि
न्छयनंगतेसतिनायंजनोवेदसवेदतंहितम् ॥ पश्यंतमाद्यंपुरुषंहियंजनोनपश्यतिस्वक्षमलंचतंभजे ॥ ११ ॥ यथानभोग्निःपवनोनसज्जते
घटेनकाष्ठेनरजोभिरावृतः ॥ तथापुमान्सर्वगुणैश्चनिर्मलोवर्णैर्यथास्यात्स्फटिकोमहोज्ज्वलः ॥ १२ ॥ व्यंग्येनवालक्षणयाचवाक्पथैरर्थैः
पदस्फोटपरायणैःपरम् ॥ नज्ञायतेतद्ध्वनिनोत्तमेनसद्वाच्यंततोब्रह्मकुतस्तुलौकिकैः ॥ १३ ॥ वदंतिकेजिद्धुविकर्मकर्तृयत्कालंचकेचित्प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रियोगमेवतत् ॥ केचिद्विचारंप्रवदन्तियच्चतद्ब्रह्मेतिवेदांतविदोवदंतिहि ॥ १४ ॥ यंनस्पृशंतीहगुणानकालजामायेंद्रियंचित्तमनोनबुद्धयः ॥
महन्नवेदोवदतीतितत्परंविशंतिसर्वेनलविस्फुलिंगवत् ॥ १५ ॥ हिरण्यगर्भंपरमात्मतत्त्वंयद्वासुदेवंप्रवदंतिसंतः ॥ विचार्य्यतद्देववरस्यरू
पंविसृज्यमोहंविचरेदसंगः ॥ १६ ॥ यथेंदुरेकोजलपात्रवृंदगोयथाग्निरेकोविदितःसमिच्चये ॥ तथापरात्माभगवाननेकवदंतर्बहिःस्यात्सुकृ
तेषुदेहिषु ॥ १७ ॥ सूर्योदयेसर्वतमोविलीयतेप्रदृश्यतेवस्तुगृहेयथाजनैः ॥ ज्ञानोदयेऽज्ञानतमःप्रलीयतेसंप्राप्यतेब्रह्मपरंतनौतथा ॥ १८ ॥
यथेंद्रियाणांचपृथक्प्रवृत्तिभिर्नानेर्यतेर्थोतिगुणाश्रयःपरः ॥ एकंह्यनंतस्यपरस्यधामतत्तथामुनीनांकिलशास्त्रवर्त्मभिः ॥ १९ ॥ साक्षा
द्धरिर्यःपुरुषोत्तमोत्तमःश्रीकृष्णचंद्रोनिजभक्तवत्सलः ॥ कैवल्यनाथोनृगमुज्जहारतंपूर्णंस्वयंब्रह्मपरंनमाम्यहम् ॥ २० ॥ ॥ श्रीनारदउ
च ॥ ॥ इत्युक्त्वातमनुज्ञाप्यभगवान्बादरायणिः ॥ पश्यतांयादवानाञ्चतत्रैवांतरधीयत ॥ २१ ॥ इदंमयातेकथितंहरिभक्तिविवर्द्धन
म् ॥ विज्ञानखण्डंविशदंश्रोतॄणांमोक्षदंस्मृतम् ॥ २२ ॥ गर्गाचार्येणकथितानाम्नेयंगर्गसंहिता ॥ सर्वदोषहरापुण्याचतुर्वर्गफलप्रदा ॥ २३ ॥
गोलोकवृन्दावनयोर्गिरीश्वरमाधुर्ययोःश्रीमथुरापुरस्यच ॥ द्वारावतीविश्वजितोर्हलायुधविज्ञानयोःखण्डचयाःपृथङ्नव ॥ २४ ॥ श्रीकृ
ष्णमूर्तिःपरमैरसैर्यथायथाचभूमिर्भरतादिभिर्भृशम् ॥ तथाहिशश्वन्मुनिगर्गसंहिताविभातिखंडैर्नवभिर्नृपेश्वर ॥ २५ ॥ यथाहिरत्नैर्नवभि
र्विराजतेदेवांगुलौतप्तसुवर्णमुद्रिका ॥ तथाचतुर्वर्गफलप्रदेविधौसर्गैर्विसर्गैर्मुनिगर्गसंहिता ॥ २६ ॥ नरेंद्रशश्वन्मुनिसंहितायानवाहयज्ञे
नजनाःपुनीताः ॥ इहैवसौख्यंपरमाप्नुवन्तस्ततस्तुगोलोकपुरंप्रयांति ॥ २७ ॥ कृत्वाथपट्टाम्बरबन्धनंत्विमांशृणोतिवन्ध्याबहुलालसाभृ
शम् ॥ ह्रस्वेनकालेनगृहांगणेशिशून्सल्लालयंतीविचरत्यहर्निशम् ॥ २८ ॥ रोगीपुमान्रोगगणात्प्रमुच्यतेभीतोभयाद्बन्धगतश्चबन्धना
त् ॥ श्रुत्वाकथांनिर्धनएतिवैभवंमूर्खोभवेत्पण्डितएवसत्वरम् ॥ २९ ॥ यःकार्तिकेमासिनृपःश्रियायुतःशृणोतिशश्वन्मुनिगर्गसंहिताम् ॥ स
चक्रवर्तीभवितानसंशयोनरेंद्रहस्तोद्धृतचारुपादुकः ॥ ३० ॥ मनोजवैःसिंधुतुरङ्गमैर्नवैर्द्विपैश्चविंध्याचलसंभवैःपरैः ॥ वैतालिकोद्गीतय
शामहीतलेनिषेवितोवारवधूजनैःसह ॥ ३१ ॥ सुवर्णशृंगाम्बरताम्रपृष्ठंसंभूषणंरौप्यखुरंसवत्सम् ॥ ददातिखण्डंप्रतिगोद्वयंयःप्राप्नोतिसर्व



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिमनोरथंसः ॥ ३२ ॥ निष्कारणोसौशृणुतेविदेहराट्सर्वामिमांवैमुनिगर्गसंहिताम् ॥ हृत्पुण्डरीकेवसतेस्यसर्वदाश्रीकृष्णचन्द्रोनिजभक्तवत्सलः ॥ ३३ ॥ ॥ श्रीगर्गउवाच ॥ ॥ इत्युक्त्वातमनुज्ञाप्यनारदोदेवदर्शनः ॥ सर्वेषांपश्यतांब्रह्मन्नम्बरङ्गतवान्मुनिः ॥ ॥ ३४ ॥ बहुलाश्वोमहाराजःश्रीकृष्णेलग्नमानसः ॥ सर्वतस्तुकृतार्थोभूच्छ्रुत्वेमांसंहितांहरेः ॥ ३५ ॥ तवप्रश्नोपरिब्रह्मन्कथितासंहितामया ॥ श्रुतावापाठिताकैश्चित्कोटियज्ञफलप्रदा ॥ ३६ ॥ ॥ शौनकउवाच ॥ ॥ धन्योहंचकृतार्थोहंत्वत्संगेनमहामुने ॥ प्राप्तोस्मिपरमांभक्तिंश्रीकृष्णप्रेमवर्द्धिनीम् ॥ ३७ ॥ विशदहृदिमुनीनांमानसेराजहंसःसकलसुखविराजन्नादमाधुर्य्यवंशः ॥ जगतिविचलदंशःशूरवंशावतंसःकरबलहतकंसःपातुवःसत्प्रशंसः ॥ ३८ ॥ इत्युक्तातान्मुनीन्सर्वान्गर्गाचार्योमहामुनिः ॥ अनुज्ञाप्यप्रसन्नात्मागन्तुमभ्युद्यतोभवत् ॥ ३९ ॥ नवसर्गविसर्गाढ्यांस्वर्मभृद्गर्गसंहिताम् ॥चतुर्वर्गप्रदामुक्त्वागर्गोगर्गाचलंययौ ॥ ४० ॥ शरद्विकचपंकजाश्रियमतीवविद्वेषकंमिलिन्दमुनिलेढितंकुलिशकञ्चिह्नावृतम् ॥ स्फुरत्कनकनूपुरंदलितभक्ततापत्रयंचलद्द्युतिपदद्वयंहृदिदधामिराधापतेः ॥ ४१ ॥ ॥ इति श्रीमद्गर्गाचार्यसंहितायां विज्ञानखंडे नारदबहुलाश्वसंवादांतर्गतव्यासोग्रसेनसंवादे परब्रह्मनिरूपणंनामदशमोऽध्यायः ॥ १० ॥ ॥ इति श्रीविज्ञानखण्डं समाप्तम् ॥ ॥ श्रीराधाकृष्णार्पणमस्तु ॥ ॥ श्रीवेङ्कटेश्वरार्पणमस्तु ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

## इति श्रीमद्गर्गाचार्यसंहितायांनवमःश्रीविज्ञानखंडःसमाप्तः ॥

---

इदं श्रीमद्गर्गाचार्यसंहितायां श्रीविज्ञानखण्डं मुम्बय्यां श्रीकृष्णदासात्मज
खेमराजेन स्वकीये "श्रीवेङ्कटेश्वर" मुद्रणालये मुद्रितम् ।
सं० १९५४, शके १८१९.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति श्रीमद्गर्गाचार्यसंहितायां श्रीविज्ञानखंडः स० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=28.11.19 14:49
,TRANSFERRED=2019/11/28 at 14:53:30
,PAGES=19
,TYPE=STD
,NAME=S0002194
,Book Name=M-317-GARGSANHITA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection